# Jiraka

**जीरको जरणो जीरो जार्णो दीप्यश्च दीपकः ।**
**अजाजिको वह्निशङ्खो मागधश्च नवाह्वयः ।।**

**गौरादिजीरकस्तवत्वन्योऽजाजी स्यात् श्वेतजीरकः ।**
**कणाह्वा कणजीर्णा च कणा दीप्यः सितादिकः ।।**
**ज्ञेया दीर्घकणा चैव सिताजाजी गशाह्वया ।** **(Rjn)**

Synonyms of jiraka are jarana, jira, jirna, dipya, dipaka, ajajika, vahnisankha, magadha and navahvaya.

Synonyms of gauradi jiraka are sveta jiraka, kanahva, kanajirna, kana, dipya, sitadika, dirghakarna and sitajaji.

**दीपनं पाचनं हृद्यं सुगन्धयुद्गारशोधनम् ।**
**अरोचकातिसारघ्नं श्लेष्मघ्नं जीरकं कटुः ।।** **(Mdn)**

Jiraka is katu in rasa, dipana, pacana, hrdya, sugandhi, udgara sodhana, alleviates kapha, cures arocaka and atisara.

**जीरक (त्रितयं) रूक्षं कटूष्णं दीपनं लघु ।**
**संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत् ।।**
**ज्वरघ्नं पाचनं वृष्यं बल्यं रुच्यं कफापहम् ।**
**चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृत् ।।** **(Bpn)**

All the three varieties of jiraka are katu in rasa, usna in veerya, ruksa, laghu, sangrahi in guna, dipana, pacana, vrsya, balya, medhya, rucya, caksushya, pavana, alleviates kapha, increases pitta, is garbhashaya visuddhi kara, cures jvara, adhmana, gulma, chardi and atisara.

जीरकं कटुकं रूक्षं वातहृद्दीपनं परम् ।
गुल्माध्मानातिसारघ्नं ग्रहणीकृमिहृत्परम् ॥

गौराजाजी हिमा रुच्या कटुर्मधुरदीपनी ।
कृमिघ्ना विषहन्त्री च चक्षुष्याध्माननाशिनी ॥ **(Dhn)**

Jiraka is katu in rasa, ruksa in guna, dipana para, alleviates vata, cures gulma, adhmana, atisara, grahani and krmi.

Gaura ajaji is katu, madhura in rasa, hima in veerya, rucya, krmighna, visha hara, caksushya, cures adhmana.

जीरकं कटुरुष्णं च वातहृत् दीपनः परः ।
गुल्माध्मानातिसारघ्नी ग्रहणीकृमिहृत्परः ॥

गौराजाजी हिमा रुच्या कटुर्मधुरदीपनी ।
कृमिघ्नी विषहन्त्री च चक्षुष्याऽऽध्माननाशिनी ॥ **(Rjn)**

Jiraka is katu in rasa, usna in veerya, alleviates vata, is dipana para, cures gulma, adhmana, atisara, grahani and krmi.

Gaura jiraka is katu and madhura in rasa, hima in veerya, rucya, dipani, krmighni, visha haraka, caksushya, and cures adhmana.

शुभ्रजीरं कटुग्राहि पाचनं दीपनं लघु ।
किञ्चिदुष्णं च मधुरं चक्षुष्यं रुचिकृन्मतम् ॥

Subhrajira is katu, madhura in rasa, laghu in guna, kincit usna, grahi, pacana, dipana and ruci karaka.

गर्भशयशुद्धिकरं रूक्षं बल्यं सुगन्धिकम् ।

**तिक्तं वमिक्षयाध्मानं वातं कुष्ठं विषं ज्वरम् ॥**
**अरोचकं रक्तदोषं अतिसारं कृमींस्तथा ।**
**पित्तं च गुल्मरोगं च नाशयेदिति कीर्त्तितम् ॥ (Nir)**

Garbhashaya suddhikaraka, Ruksa in Property, Balya, Sugandhika, Tikta in Rasa, Vami-Ksaya-Adhmana-Vata-Kustha-Visa-Jvara-Arocaka-Raktadosha-Atisara-Krmi-Pittam-Gulma roga-Nasayati.

**जीरकं कटुतिक्तोष्णं रूक्षं पाकोषणं लघु ।**
**रुच्यं संग्राहि चक्षुष्यं गर्भाशविशोधनम् ॥**
**पित्तलं दीपनं मेध्यं हृद्यं वातकफापहम् ।**
**सुगन्धि पाचनं छर्द्दिगुल्माध्मानातिसारजित् ॥ (Kdn)**

Jiraka is Katu, Tikta in Rasa, Usna in Potency, Ruksa in Property, Usna in Paka, Laghu in Property, Rucya, Sangrahi, Caksushya, Garbhashaya visodhana, Pittala, Dipana, Medhya, Hrdya, Vata Kapha hara, Sugandhi, Pacana, Chardi-Gulma-Adhmana-Atisara hara.